॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ९०

लक्ष्मणेन तु तद्वाक्यमुक्तं श्रुत्वा स राघवः ।
रावणाय शरान्घोरान्विससर्ज चमूमुखे ॥ १॥

दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ।
आजघान महाघोरैर्धाराभिरिव तोयदः ॥ २॥

दीप्तपावकसङ्काशैः शरैः काञ्चनभूषणैः ।
निर्बिभेद रणे रामो दशग्रीवं समाहितः ॥ ३॥

भूमिस्थितस्य रामस्य रथस्थस्य च रक्षसः ।
न समं युद्धमित्याहुर्देवगन्धर्वदानवाः ॥ ४॥

ततः काञ्चनचित्राङ्गः किङ्किणीशतभूषितः ।
तरुणादित्यसङ्काशो वैदूर्यमयकूबरः ॥ ५॥

सदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः ।
हरिभिः सूर्यसङ्काशैर्हेमजालविभूषितैः ॥ ६॥

रुक्मवेणुध्वजः श्रीमान्देवराजरथो वरः ।
अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात् ॥ ७॥

अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः ।
प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः ॥ ८॥

सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते ।
दत्तस्तव महासत्त्व श्रीमाञ्शत्रुनिबर्हणः ॥ ९॥

इदमैन्द्रं महच्चापं कवचं चाग्निसंनिभम् ।
शराश्चादित्यसङ्काशाः शक्तिश्च विमला शिताः ॥ १०॥

आरुह्येमं रथं वीर राक्षसं जहि रावणम् ।
मया सारथिना राम महेन्द्र इव दानवान् ॥ ११॥

इत्युक्तः स परिक्रम्य रथं तमभिवाद्य च ।
आरुरोह तदा रामो लोकाँल्लक्ष्म्या विराजयन् ॥ १२॥

तद्बभूवाद्भुतं युद्धं द्वैरथं लोमहर्षणम् ।
रामस्य च महाबाहो रावणस्य च रक्षसः ॥ १३॥

स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः ।
अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥ १४॥

अस्त्रं तु परमं घोरं राक्षसं राकसाधिप ।
ससर्ज परमक्रुद्धः पुनरेव निशाचरः ॥ १५॥

ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः ।
अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः ॥ १६॥

ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः ।
राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः ॥ १७॥

तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः ।
दिशश्च सन्ततः सर्वाः प्रदिशश्च समावृताः ॥ १८॥

तान्दृष्ट्वा पन्नगान्रामः समापतत आहवे ।
अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम् ॥ १९॥

ते राघवधनुर्मुक्ता रुक्मपुङ्खाः शिखिप्रभाः ।
सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः ॥ २०॥

ते तान्सर्वाञ्शराञ्जघ्नुः सर्परूपान्महाजवान् ।
सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥ २१॥

अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः ।
अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः ॥ २२॥

ततः शरसहस्रेण राममक्लिष्टकारिणम् ।
अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत ॥ २३॥

पातयित्वा रथोपस्थे रथात्केतुं च काञ्चनम् ।
ऐन्द्रानभिजघानाश्वाञ्शरजालेन रावणः ॥ २४॥

विषेदुर्देवगन्धर्वा दानवाश्चारणैः सह ।
राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः ॥ २५॥

व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः ।

रामचन्द्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा ॥ २६ ॥

प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् ।
समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ॥ २७ ॥

सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः ।
उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम् ॥ २८ ॥

शस्त्रवर्णः सुपरुषो मन्दरश्मिर्दिवाकरः ।
अदृश्यत कबन्धाङ्गः संसक्तो धूमकेतुना ॥ २९ ॥

कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम् ।
आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे ॥ ३० ॥

दशास्यो विंशतिभुजः प्रगृहीतशरासनः ।
अदृश्यत दशग्रीवो मैनाक इव पर्वतः ॥ ३१ ॥

निरस्यमानो रामस्तु दशग्रीवेण रक्षसा ।
नाशकदभिसन्धातुं सायकान्रणमूर्धनि ॥ ३२ ॥

स कृत्वा भ्रुकुटीं क्रुद्धः किं चित्संरक्तलोचनः ।
जगाम सुमहाक्रोधं निर्दहन्निव चक्षुषा ॥ ३३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com